# sphuratkRRiShNapremAmRRitastotram

# સ્ફુરત્કૃષ્ણપ્રેમામૃતસ્તોત્રમ્

## Document Information

Text title : sphuratkRRiShNapremAmRRitastotram

File name : sphuratkRRiShNapremAmRRitastotram.itx

Category : vishhnu, krishna, puShTimArgIya, viThThaleshvara

Location : doc_vishhnu

Author : viThThaleshvara

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સ્ફુરત્કૃષ્ણપ્રેમામૃતસ્તોત્રમ્

સ્ફુરત્કૃષ્ણપ્રેમામૃતરસભરેણાતિભરિતા
વિહારાત્કુર્વાણા વ્રજપતિવિહારાબ્ધિષુ સદા ।
પ્રિયા ગોપીભર્તુઃ સ્ફુરતુ સતતં વલ્લભ ઇતિ
પ્રધાવત્યસ્માકં હૃદિ સુભગમૂર્તિઃ સકરુણા ॥ ૧॥

શ્રીભાગવતપ્રતિપદમણિવરભાવાંશુભૂષિતા મૂર્તિઃ ।
શ્રીવલ્લભાભિધાનસ્તનોતિ નિજદાસ્યસૌભાગ્યમ્ ॥ ૨॥

માયાવાદતમો નિરસ્ય મધુભિત્સેવાખ્યવર્ત્માદ્ભુતં
શ્રીમદ્ગોકુલનાથસઙ્ગમસુધાસમ્પ્રાપકં તત્ક્ષણાત્ ।
દુષ્પ્રાપં પ્રકટીચકાર કરુણારાગાદિસમ્મોહનઃ
સ શ્રીવલ્લભભાનુરુલ્લસતિ યઃ શ્રીવલ્લવીશાન્તરઃ ॥ ૩॥

ક્વચિત્પાણ્ડિત્યં ચેન્ન નિગમગતિઃ સાપિ યદિ ન
ક્રિયા સા સાપિ સ્યાદ્યદિ ન હરિમાર્ગે પરિચયઃ ।
યદિ સ્યાત્સોઽપિ શ્રીવ્રજપતિરતિર્નેતિ નિખિલૈ-
ર્ગુણૈરન્યઃ કો વા વિલસસિ વિના વલ્લભવરમ્ ॥ ૪॥

માયાવાદિકરીન્દ્રદર્પદલનેનાસ્યેન્દુરાજોદ્ગત-
શ્રીમદ્ભાગવતાખ્યદુર્લભસુધાવર્ષેણ વેદોક્તિભિઃ ।
રાધાવલ્લભસેવયા તદુચિતપ્રેમ્ણોપદેશૈરપિ
શ્રીમદ્વલ્લભનામધેયસદૃશો ભાવી ન ભૂતોઽસ્ત્યપિ ॥ ૫॥

યદઙ્ઘ્રિનખમણ્ડલપ્રસૃતવારિપીયૂષયુગ્-
વરાઙ્ગહૃદયૈઃ કલિસ્તૃણમિવેહ તુચ્છીકૃતઃ ।
વ્રજાધિપતિરિન્દિરાપ્રભૃતિમૃગ્યપાદામ્બુજઃ
ક્ષણેન પરિતોષિતસ્તદનુગત્વમેવાસ્તુ મે ॥ ૬॥

અઘૌઘતમસાઽઽવૃતં કલિભુજઙ્ગમાસાદિતં

જગદ્વિષયસાગરે પતિતમસ્વધર્મે રતમ્ ।
યદીક્ષણસુધાનિધિઃ સમુદિતોઽનુકમ્પામૃતા-
દમૃત્યુમકરોત્ક્ષણાદરણમસ્તુ મે તત્પદમ્ ॥ ૭॥

ઇતિ શ્રીવિઠ્ઠલેશ્વરવિરચિતં સ્ફુરત્કૃષ્ણપ્રેમામૃતસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*sphuratkRRiShNapremAmRRitastotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*